# 17 - सप्तदश दशकम्

# ध्रुव चरितम्

उत्तान पाद नृपतेर् मनु नन्दनस्य
जाया बभूव सुरुचिर् नितरा मभीष्टा ।
अन्या सुनीति रिति भर्तु रनादृता सा
त्वामेव नित्य मगतिश् शरणं गताऽभूत् ॥ ॥17-1॥

अङ्के पितुस् सुरुचि पुत्रक मुत्तमं तं
दृष्ट्वा ध्रुवः किल सुनीति सुतो ऽधिरोक्ष्यन् ।
आचिक्षिपे किल शिशुस् सुतरां सुरुच्या
दुस् सन्त्यजा खलु भवद् विमुखै रसूया ॥ ॥17-2॥

त्वन् मोहिते पितरि पश्यति दार वश्ये
दूरं दुरुक्ति निहतस् स गतो निजाम्बाम् ।
साऽपि स्वकर्म गति सन्तरणाय पुंसां
त्वत् पादमेव शरणं शिशवे शशंस ॥ ॥17-3॥

आकर्ण्य सोऽपि भवदर्चन निश्चितात्मा
मानी निरेत्य नगरात् किल पञ्चवर्षः ।
सन्दृष्ट नारद निवेदित मन्त्र मार्गः
त्वा मारराध तपसा मधुकान नान्ते ॥ ॥17-4॥

ताते विषण्ण हृदये नगरीं गतेन
श्रीनारदेन परिसान् त्वित चित्त वृत्तौ ।
बालस् त्वदर्पित मनाः क्रम वर्धितेन
निन्ये कठोर तपसा किल पञ्चमासान् ॥ ॥17-5॥

तावत् तपोबल निरुच्छ्वसिते दिगन्ते
देवार्थितस् त्वमुदयत् करुणार्द्र चेताः ।
त्वद्रूप चिद्रस निलीन मतेः पुरस्तात्
आविर् बभूविथ विभो गरुडाधिरूढः ॥ ॥17-6॥

त्वद् दर्शन प्रमद भार तरङ्गितं तं
दृग्भ्यां निमग्न मिव रूप रसायने ते ।
तुष्टूषमाण मवगम्य कपोल देशे
संस्पृष्टवा नसि दरेण तथाऽऽदरेण ॥ ॥17-7॥

तावत् विबोध विमलं प्रणुवन्त मेनम्
आभाषथास् त्व मवगम्य तदीय भावम् ।
राज्यं चिरं समनुभूय भजस्व भूयः
सर्वोत्तरं ध्रुव पदं विनिवृत्ति हीनम् ॥ ॥17-8॥

इत्यूचुषि त्वयि गते नृप नन्दनोऽसौ
आनन्दिताखिल जनो नगरी मुपेतः ।
रेमे चिरं भवदनुग्रह पूर्णकामः
ताते गते च वनमादृत राज्यभारः ॥ ॥17-9॥

यक्षेण देव निहते पुन रुत्तमेऽस्मिन्
यक्षैस् स युद्ध निरतो विरतो मनूक्त्या ।
शान्त्या प्रसन्न हृदयात् धनदा दुपेतात्
त्वद् भक्ति मेव सुदृढा मवृणोन् महात्मा ॥ ॥17-10॥

अन्ते भवत् पुरुष नीत विमान यात:
मात्रा समं ध्रुवपदे मुदितोऽय मास्ते ।
एवं स्वभृत्य जन पालन लोल धीस् त्वं
वातालयाधिप निरुन्धि ममा मयौघान् ॥ ॥17-11॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥